# ॥श्रीस्तोत्रम् अग्निपुराणान्तर्गतम्॥




अग्निपुराण के अनुसार पूर्वकाल में इन्द्र ने राज्यलक्ष्मी की स्थिरता के लिए भगवती लक्ष्मी की स्तुति की थी। इस स्तोत्र का पाठ करने से भोग तथा मोक्ष मिलता है। मनुष्य को चाहिए सदा ही लक्ष्मी के इस स्तोत्र का पाठ और श्रवण करे।

यह स्तोत्र विष्णु पुराण, प्रथम अंश, नवम अध्याय में भी वर्णित है जिसमें यह वर्णित है कि महालक्ष्मी ने इंद्र को वरदान दिया था कि जो मनुष्य प्रातःकाल तथा सांयकाल इस स्तोत्र का पाठ करता है, माँ लक्ष्मी उससे कभी विमुख नहीं होती

***पुष्कर उवाच***

***राज्यलक्ष्मीस्थिरत्वाय यथेन्द्रेण पुरा श्रियः ।***

***स्तुतिः कृता तथा राजा जयार्थं स्तुतिमाचरेत् ।।१।।***

***इन्द्र उवाच ।***

***नमस्ये सर्वलोकानां जननीमब्धिसम्भवां ।***

***श्रियमुन्निद्रपद्माक्षीं विष्णुवक्षःस्थलस्थितां ।।२।।***

त्वं सिद्धिस्त्वं स्वधा स्वाहा सुधा त्वं लोकपावनि ।
सन्ध्या रात्रिः प्रभा भूतिर्म्मेधा श्रद्धा सरस्वती ।।३।।

यज्ञविद्या महाविद्या गुह्यविद्या च शोभने ।
आत्मविद्या च देवि त्वं विमुक्तिफलदायिनी ।।४।।

आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिस्त्वमेव च ।
सौम्या सौम्यैर्जगद्रूपैस्त्वयैतद्देवि पूरितं ।।५।।

का त्वन्या त्वामृते देवि सर्वयज्ञमयं वपुः ।
अध्यास्ते देव देवस्य योगिचिन्त्यं गदाभृतः ।।६।।

त्वया देवि परित्यक्तं सकलं भुवनत्रयं ।

विनष्टप्रायमभवत् त्वयेदानीं समेधितं ।।७।।

दाराः पुत्रास्तथागारं सुहृद्धान्यधनादिकं ।
भवत्येतन्महाभागो नित्यं त्वद्वीक्षणान् नृणां ।।८।।

शरीरारोग्यमैश्वर्यमरिपक्षक्षयः सुखं ।
देवि त्वद्दृष्टिदृष्टानां पुरुषाणां न दुर्ल्लभं ।।९।।

त्वमम्बा सर्वभूतानां देवदेवो हरिः पिता ।
त्वयैतद्विष्णुना चाम्ब जगद्व्याप्तं चराचरं ।।१०।।

मानं कोषं तथा कोष्ठं मा गृहं मा परिच्छदं ।
मा शरीरं कलत्रञ्च त्यजेथाः सर्व्वपावनि ।।११।।

मा पुत्रान्मासुहृद्वर्गान्मा पशून्मा विभूषणं ।
मम देवस्य विष्णोर्वक्षःस्थलालये ।।१२।।

सत्वेन सत्यशौचाभ्यां तथा शीलादिभिर्गुणैः ।
त्यज्यन्ते ते नरा सद्यः सन्त्यक्ता ये त्वयामले ।।१३।।

त्वयावलोकिताः सद्यः शीलाद्यैरखिलैर्गुणेः ।
कुलैश्वर्य्यैश्च युज्यन्ते पुरुषा निर्गणा अपि ।।१४।।

सश्लाघ्यः स गुणी धन्यः स कुलीनः स बुद्धिमान् ।
स शूरः स च विक्रान्तो यस्त्वया देवि वीक्षितः ।।१५।।

सद्यो वैगुण्यमायान्ति शीलाद्याः सकला गुणाः ।
परामुङ्मुखी जगद्धात्री यस्य त्वं विष्णुवल्लभे ।।१६।।

न ते वर्णयितुं शक्ता गुणान् जिह्वापि वेधसः ।
प्रसीद देवि पद्माक्षि नास्मांस्त्याक्षईः कदाचन ।।१७।।

पुष्कर उवाच ।
एवं स्तुता ददौ श्रीश्च वरमिन्द्राय चेप्सितं ।
सुस्थिरत्वं चराज्यस्य सङ्ग्रामविजयादिकं ।।१८।।

स्वस्तोत्रपाठश्रवणकर्तॄणां भुक्तिमुक्तिदं ।
श्रीस्तोत्रं तस्मात् पठेच्च श्रृणुयान्नरः ।।१९।।

**Essence Of Astrology**
*- By Lokesh Agrawal*
http://essenceofastro.blogspot.com/
https://www.facebook.com/essenceofastro